**संस्कृत वार्ताः**

**दिनाङ्क : 27/06/2026**

**सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्री  नरेन्द्रमोदी त्रिदिवसीय-आधिकारिक-प्रवासार्थं सेशल्स-देशस्य 'विक्टोरिया' नगरे सम्प्राप्तः ।

- तमिलनाडु-राज्ये वाइको इत्यस्य नेतृत्वे एमडीएमके दलेन डीएमके दलेन सह स्वीय नववर्षीयं गठबन्धनं समाप्तम्।

- प्रसिद्धः तमिल-चलच्चित्र-अभिनेता निर्देशकः च के. भाग्यराजः अद्य चेन्नैयां पंचत्वे विलीनः।

- प्रधानमन्त्री नरेन्द्रमोदी श्वः आकाशवाण्याः 'मन की बात' इति जनप्रिय-मासिक-कार्यक्रमे देश-विदेशस्य जनैः सह स्वीय मनोगतं विनिमयीकरिष्यति।

- अमेरिका-देशस्य विदेशमन्त्री मार्को रुबियो अवदत् यत् 'ट्रम्प-प्रशासनं' भारतं संयुक्तराज्य-अमेरिकायाः अत्यन्तं निकटतमेषु रणनीतिक-सहयोगिषु अन्यतमं मन्यते।

- **अपि च,** फीफा-विश्वकपस्पर्धामालिकायां मिस्र-देशः ईरान-देशेन सह अन्तिमे 'जी' समूहस्य द्वन्द्वे एकं - एकं इत्यंकान्तरालेन समता प्राप्य प्रथमतया फीफा-विश्वकप स्पर्धायाः 'नॉकआउट' इत्येतस्मिन् चरणे प्रविष्टः।

**अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री – सेशल्स**

प्रधानमन्त्री नरेन्द्रमोदी त्रिदिवसीय-प्रवासार्थं सेशल्स-देशस्य राजधान्यां 'विक्टोरिया' नगरे सम्प्राप्तः। सामाजाकिांतर्जालीय प्रेषिते सन्देशे श्रीमोदिना विमानपत्तने सेशल्स-देशस्य राष्ट्रपतिना डॉ. पैट्रिक हर्मिनी इत्यनेन कृत्-भव्य-स्वागतस्य भूरि-भूरि प्रशंसा विहिता। प्रधानमन्त्रिणा प्रतिपादितं यत्सेशल्स-देशः हिन्दमहासागरे भारतस्य एकः सामुद्रिक-सहयोगी दृढः मित्रदेशश्च वर्तते। मोदी अवोचत् यत् सः अस्याः यात्रायाः माध्यमेन उभयोः देशयोः दीर्घकालीन-सम्बन्धान् सुदृढीकर्तुं , नागरिक-कल्याणाय सहयोगं वर्धयितुं संवादं प्रति आशान्वितः अस्ति। अनेन सहैव, तेन विमानपत्तने भारतीय-प्रवासि-जनसमूहाय अपि हार्दिक-स्वागतार्थं धन्यतावचांसि ज्ञापितानि, गदितं च यत् भारतीय-प्रवासिभिः यथा स्वसंस्कृतिः संरक्षिता, सा श्लाघनीया अस्ति।

अवधेयास्पदं वर्तते यत् प्रधानमन्त्री नरेन्द्रमोदी सेशल्स-देशस्य ऐतिहासिक-पंचाशत् तमस्य स्वतन्त्रता-दिवस-समारोहस्य 'मुख्य-अतिथिः' भविष्यति।

## एम्. डी. एम्. के.

तमिळुनाडुराज्ये वाईको इत्यस्य नेतृत्वे एम्. डी. एम्. के. दलं डी. एम्. के. इत्यनेन सह नववर्षीयं गठबन्धनं समापितवान्। दलस्य सचिवः वाईको वर्यः अद्य चेन्नई-नगरे सामान्यपरिषदः सभायाः नेतृत्वं कृतवान्, अपि च सभायां गठबन्धनात् बहिर्गन्तुं सामान्यः प्रस्तावः स्वीकृत:। अवधेयं यत् एम्. डी. एम्. के. दलं सप्तदशाधिक द्विसहस्रतमे वर्षे डी. एम्. के. इत्यस्य नेतृत्वे जाते धर्मनिरपेक्ष-प्रगतिशील-सङ्घटने सम्मिलितः आसीत्। विधानसभायां एम्. डी. एम्. के. दलस्य द्वौ विधायकौ स्तः।

## के. भाग्यराजः

प्रख्यातः तमिळ्-चलच्चित्राभिनेता निर्देशकः च के. भाग्यराजः अद्य प्रातःकाले चेन्नई-नगरे दिवङ्गतः। सः त्रिसप्ततिः वर्षीयः आसीत्। प्रख्यातः चलच्चित्रनिर्माता भाग्यराजः चित्ताकर्षक-चित्रकथायाः, विनोदपूर्ण-संवादानां च कृते प्रसिद्धः आसीत्, येन सः तमिळ्-चलच्चित्रजगति अद्वितीयं स्थानम् अवाप्नोत्। तेन पञ्चविंशति-तोप्यधिकानि चलच्चित्राणि निर्देशितानि, प्रायः पञ्चसप्ततिः चलच्चित्रेषु अभिनयं चाकरोत्।

उपराष्ट्रपतिः सी पी राधाकृष्णन् वर्यः सुप्रसिद्धस्य चलच्चित्रनिर्मातुः, अभिनेतुः, चित्रकथालेखकस्य च थिरु के भाग्यराजस्य निधने शोकं प्रकटितवान्।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी श्वः प्रात: एकादशवादने आकाशवाण्याः 'मन की बात' इति कार्यक्रमे देश-विदेशस्य जनैः सह स्वीयमनोगतं विनिमयी करिष्यति। मासिक-आकाशवाणी-कार्यक्रमस्य अयं पंचत्रिंशदधिकैकशततमो संस्करणो भविता।

कार्यक्रमस्यास्य प्रसारणं कृत्स्ने हि आकाशवाणी-दूरदर्शन-जालपुटे , 'एआईआर न्यूज' 'न्यूजऑनएयर' चलदूरभाषीय-तन्त्रांशे च युगपद् भविष्यति। अनेन सहैव, एआईआर न्यूज, डीडी न्यूज, प्रधानमन्त्रि-कार्यालयः (PMO) तथा सूचना-प्रसारण-मन्त्रालयस्य यूट्यूब-वाहिनीष्वपि अस्य साक्षात्-प्रसारणं भविता। हिन्दी-प्रसारणस्य अनुपदमेव आकाशवाणी अस्य कार्यक्रमस्य अनुवादं क्षेत्रीय-भाषासु अपि प्रसारयिष्यति।

## मार्को रुबियो

अमेरिका-देशस्य विदेशमन्त्री मार्को रुबियो प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वस्य भूरि-भूरि प्रशंसां अकरोत्। तेनोदीरितं यत् भारतेन उल्लेखनीयः आर्थिक-विकासः कृतः, सहैव देशोऽयं सम्प्रति वैश्विक-मञ्चे इतोऽपि महतीं भूमिकां निर्वहति। वाइट हाउस् इत्यत्र वार्ताहरैः सह संवादक्रमे रुबियो स्पष्टीकृतवान् यत् 'ट्रम्प-प्रशासनं' भारतं संयुक्तराज्य-अमेरिकायाः अत्यन्तं निकटतमेषु रणनीतिक-सहयोगिषु अन्यतमं मन्यते।

तेन प्रतिपादितं यत् प्रधानमन्त्रिणः मोदिनः कुशल-नेतृत्वे भारतं दृढं आर्थिक-लाभं प्राप्नुवद् अस्ति, सहैव प्रभावशाली-वैश्विक-शक्तित्वेन समुदेति। रुबियो एतदपि संसूचयत् यत् प्रधानमन्त्रिणः मोदिनः राष्ट्रपति-डोनाल्ड-ट्रम्पस्य च सम्बन्धः अतीव घनिष्ठो वर्तते, यः कूटनीति-दृष्ट्या अतीव महत्त्वपूर्णः अस्ति।

**विरामः**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**अमित शाहः**

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य उदघोषयत् यत् देशस्य सहकारी-यान-आह्वान-मञ्चस्य 'भारत टैक्सी' इत्यस्य आगामी-वर्षद्वयाभ्यन्तरे देशस्य नगरेषु क्षेत्रेषु च विस्तारः करिष्यते।

'भारत टैक्सी' इत्यस्य आधिकारिक-शुभारम्भावधौ मन्त्री अमितशाहः सबलं प्रावोचत् यत् एषः प्रयासः सहकारिता-क्षेत्रे एकः 'क्रान्तिकारि-पदक्षेपो वर्तते। तेन प्रतिपादितं यत् 'भारत टैक्सी' इत्यस्य मुख्यमुद्देश्यम् वर्तते यत् यानचालकाः 'सारथी' इति नाम्ना सम्बोधिताः भविष्यन्ति सहैव साक्षात् अंशधारिणः च भविष्यन्ति। तेभ्यः निष्पक्षं पारदर्शिनं च यातायात-मञ्चं प्रदीयते । अमितशाहः प्रत्यपादयत् यत् प्रारूपोऽयं सुनिश्चितं करिष्यति यत् चालकाः स्वकार्याय महत्तमं भागं प्राप्नुयुः, सगैव यात्रिणः अपि सुरक्षित-सुलभ-सेवाभिः उपकृताः भवेयुः।

**एमएसएमई दिवस**

विश्वस्य कस्यापि अर्थव्यवस्थायाः शक्तिः तस्य एमएसएमई क्षेत्रस्य योगदाने निहिता अस्तीति उपराष्ट्रपतिः सी. पी. राधाकृष्णन् न्यगादीत्।अद्य नवदेहल्यां ' विश्व एमएसएमई विंशतिः षड्विंशतेः दिवसावसरे आयोजितं एकं कार्यक्रमं अभिसम्बोधयन् तेन प्रख्यापितं यत् भारते एमएसएमई क्षेत्रं प्रथमतया उद्यमिनां साहसस्य उद्यमशीलतायाः च प्रतीकं वर्तते।

उपराष्ट्रपतिणा सविशेषं प्रतिपादितं यत् इदं क्षेत्रं अविरतं उच्चगुणवत्तास्तरं स्थापयित्वा देशस्याहत्य निर्याते प्रायः पंचाशत् प्रतिशतात्मकं योगदानं ददाति। श्रीराधाकृष्णन् अग्रे अब्रवीत् यत् सप्तचत्वारिंशदधिकद्विसहस्रतमवर्षपर्यन्तं भारतं 'विकसितभारतम्' कर्तुं प्रवृत्तायां यात्रायाम् एमएसएमई सम्प्रति सुदृढतमः आधारस्तम्भो जातः ।

**प्रधानमंत्री संग्रहालय**

प्रधानमन्त्रि-सङ्ग्रहालय-पुस्तकालयेनाद्य पूर्व-प्रधानमन्त्रिणः पी. वी. नरसिंह रावस्य पंचाधिकैकशततमजन्मजयन्त्यावसरे तस्य जीवनं-न्यासं च अभिलक्ष्य एका प्रदर्शिनी समायोजिता। अस्याः प्रदर्शिन्याः उद्घाटनं पीएमएमएल कार्यकारी-परिषदः अध्यक्षेण नृपेन्द्र मिश्रेण विहितम्, तदनन्तरं 'प्रधानमन्त्रि-सङ्ग्रहालये' आगंतुकानां कृते इयं मुक्ता कृता।

अस्यां प्रदर्शिन्याम् पी. वी. नरसिंह रावस्य सार्वजनिक-जीवनस्य उत्कृष्टायाः यात्रायाः संस्मरणानि, दुर्लभानि छायाचित्राणि, आधिकारिक-प्रपत्राणि, भाषणानि, अभिलेखीय-सामग्र्यश्च प्रदर्शिताः सन्ति।

**बैडमिंटन**

अमेरिकायाः कैलिफोर्निया-राज्यस्य फुलेर्टन नगरे प्रवृत्तायां 'यू.एस. ओपन' बैडमिंटन-प्रतियोगितायाम् भारतस्य देविका सिहागः, रौनक चौहानः च स्व-स्ववर्गेषु विजयम् अवाप्य प्रागुपान्त्य-चक्रे प्रविष्टवन्तौ।

**फीफा**

फीफा विश्वकप स्पर्धायां मिस्र-देशः ईरान-देशेन सह अन्तिमे 'जी' समूहस्य द्वन्द्वे एकं - एकं इति अङ्कैः समता प्राप्य प्रथमतया फीफा विश्वकप स्पर्धायाः 'नॉकआउट' चरणे प्रविष्टः। अस्मिन् द्वन्द्वे ईरान-देशस्य 'रामिन रेजाईन' क्रीडायाः नायकत्वेन उद्घोषितः। अधुना 'राउण्ड ऑफ ३२' चरणे तस्य सामना ऑस्ट्रेलिया-दलेन सह भविष्यति।

**।। इति वार्ता: ।।**